इति शब्दचन्द्रिका । मुच्चिरी इति भाषा ॥

कादम्बिनी, स्त्री, (कादम्बाः कलहंसाः सन्ति अस्याम् । कादम्ब + इनि ङीप् ।) मेघमाला । मेघश्रेणिः । इत्यमरः । १ । ३ । ८ ॥

कादाचित्कं, क्ली, कदाचिद्भवम् । इति मुग्धबोधव्याकरणम् ७ । १५ ॥ (यथा, साहित्यदर्पणे ३ ।२७ ।
"यद्यपि रसाभिन्नतया चर्व्वणस्यापि न कार्य्यत्वं तथापि तस्य कादाचित्कतया उपचरितेन कार्य्यत्वेन कार्य्यत्वमुपचर्य्यते" ॥)

काद्रवेयः, पुं, (कद्रोरपत्यं पुमान् । कद्रु + "शुभ्रादिभ्यश्च" । ४ । १ । १२३ । इति ढक् । "ढे लोपोऽकाद्रवाः" । ६ । ४ । १४ । इति न लोपः ।) कद्रुसन्तानः । नागः । इत्यमरः । १ । ८ । ४ ॥
(यथा, महाभारते १ । ६५ । ४१ ।
"शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ।
कूर्म्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्त्तिताः" ॥)

कानकं, क्ली, (कनकं फलमिव उग्रं फलं अस्त्यस्य । कनक + अण् ।) जयपालवीजम् । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । सारकत्वम् । उत्क्लेदकारित्वञ्च । इति राजवल्लभः ॥ (वैद्यकचक्रपाणिसंग्रहे वृहत्सिंहनादगुग्गुलौ व्यवहारोऽस्य यथा ।
"सहस्रं कानकफलं सिद्धे संचूर्ण्य निक्षिपेत् ।
ततो माषद्वयं जग्ध्वा पिबेत्तप्तजलादिकम्" ॥)

काननं, क्ली, (कं जलं अननं जीवनमस्य । यद्वा कानयति दीपयति । कनदीप्तौ + णिच् + ल्युट् ।) वनम् । (यथा, मेघदूते ४४ ।
"शीतो वायुः परिणमयिता काननोडुम्बराणाम्" ॥
कस्य ब्रह्मणः आननं मुखम् ।) ब्रह्मणो मुखम् । गृहम् । इति मेदिनी ॥

काननारिः, पुं, (काननस्य अरिरिव । शमीगर्भोत्थिताग्निना सर्व्वकाननस्य दहनात् तथात्वम् ।) शमीवृक्षः । इति शब्दचन्द्रिका ॥ (अस्य गुणादयः शमीशब्दे बोद्धव्याः ॥)

कानीनः, पुं स्त्री, (कन्यायां अनूढायां जातः कन्याया जातो वा । कन्या + "कन्यायाः कनीन च" । ४।१। ११६ । इति अण् कनीनादेशश्च ।) अनूढापुत्त्रः । तत्पर्य्यायः । कन्यकाजातः २ । इत्यमरः । २ । ६ । २४ ॥ सा कन्या यद्यनूढा पितृगृह एव तिष्ठति तदा तत्पुत्त्रो मातामहस्यैव यथा,—
"कानीनः कन्यकाजातो मातामहसुतो मतः" ॥
इति याज्ञवल्क्यः ॥ यद्यूढा तदा वोढुरेव यथा,—
"पितृवेश्मनि कन्या तु यं पुत्त्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुःकन्यासमुद्भवम्" ॥
इति मनुः ॥ व्यासे कर्णे च पुं । इति मेदिनी ॥

कान्तं, क्ली, (कनते दीप्यते इति । कन + कर्त्तरि क्तः ।) कुङ्कुमम् । इति राजनिर्घण्टः ॥ लौहविशेषः । तस्य लक्षणं यथा,—
"स्वादुर्य्यत्र भवेन्निम्बकल्को रात्रिन्दिवोषितः ।
कान्तं तदुत्तमं यत्र रूप्येणावर्त्तितं मिलेत्" ॥
तस्य परीक्षा । यथा ।
पात्रे यस्मिन् विसरति जले तैलविन्दुर्निक्षिप्तो
विद्धं गन्धं विसृजति निजं स्वर्जितं निम्बकल्कैः ।
पाके दुग्धं भजति शिखराकारतां नैति भूमौ
कान्तं लौहं तदिदमुदितं लक्षणोक्तं न चान्यत्" ॥
इति सुखबोधः ॥ अपि च ।
"यत्पात्रे न प्रसरति जले तैलविन्दुर्निक्षिप्तो
हिङ्गुर्गन्धं त्यजति भजते स्वादुतां निम्बकल्कः ।
पाके दुग्धं भवति शिखराकारवन्नैति भूमौ
कृष्णाङ्गः स्यात् सजलचणकः कान्तलौहं वदन्ति" ॥
इति वैद्यकम् ॥ (वैद्यकरसेन्द्रसारसंग्रहे वृहत्सर्व्वज्वरहरलौहेऽस्य व्यवहारो यथा,—
"पारदं गन्धकं शुद्धं ताम्रमभ्रञ्च माक्षिकम् ।
हिरण्यं तारतालञ्च कर्षमेकं पृथक् पृथक् ॥
मृतं कान्तं पलं देयं सर्व्वमेकीकृतं शुभम्" ॥)

कान्तः, त्रि, (काम्यते इति । कम् + कर्म्मणि क्तः "यस्य विभाषा" । ७ । २ ।१५ । इति नेट् । अनुनासिकस्येति दीर्घः ।) मनोरमः । शोभनः । इत्यमरमेदिनीकरौ ॥ (यथा,
"मलिनमपि मृगाक्ष्या वल्कलं कान्तरूपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति" ।
इति शाकुन्तले १ अङ्के ॥)

कान्तः, पुं, (कम् + क्त ।) श्रीकृष्णः । चन्द्रः । इति शब्दरत्नावली ॥ पतिः । (यथा मेघदूते । १०९ ।
'कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः' ॥)
चन्द्रसूर्य्यायःपर्य्यायान्तःशिला । यथा । चन्द्रकान्तसूर्य्यकान्तायस्कान्तादयः । इति मेदिनी ॥ हिज्जलवृक्षः । वसन्त ऋतुः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥
शिवः । यथा, तत्रैव १३ । १७ । १४८ ।
"शुद्धः कान्तो निजः सर्गः पवित्रं सर्व्वपावनः" ॥
कार्त्तिकेयः । यथा, तत्रैव २ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यवाग्भुवनेश्वरः" ॥)

कान्तपक्षी, [न्] पुं, (कान्तस्य कार्त्तिकेयस्य पक्षी । मयूरस्य कार्त्तिकवाहनत्वात्तथात्वम् ।) मयूरः । इति शब्दचन्द्रिका ॥

कान्तपुष्पः, पुं, (कान्तानि मनोरमाणि पुष्पाण्यस्य ।) कोविदारवृक्षः । इति राजनिर्घण्टः ॥

कान्तलकः, पुं, (कान्तं लक्यते आस्वाद्यते । कान्त + लक आस्वादने + घञर्थे कः । यद्वा काम्यते इति "मतिबुद्धिपूजार्थेभ्यश्च क्तः" । ३ । २ । १८८ । इति क्तः । कान्तः । ततः लकतीति । लक + अच् । कान्तश्चासौ लकश्चेति ।) नन्दीवृक्षः । इत्यमरः । २।४।१२० ॥ तुंद इति भाषा ॥

कान्तलौहं, क्ली, (कान्तं लौहश्रेष्ठत्वात् कमनीयं लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥ (अस्य परीक्षादिकं कान्तशब्दे द्रष्टव्यम् ॥ अस्य निरुत्थीकरणं यथा, ॥
"शुद्धस्य सूतराजस्य भागो भागद्वयं बलेः ।
द्वयोः समं लौहचूर्णं मर्द्दयेत् कन्यकाद्रवैः ॥
यामद्वयं ततो गोलं स्थापयेत्ताम्रभाजने ।
आच्छाद्यैरण्डजैः पत्रैरुष्णो यामद्वयाद्भवेत् ॥
त्रिदिनं धान्यराशिस्थं ततस्तोमर्द्दयेद्दृढम् ।
रजश्चाद्वस्त्रगलितं नीरे तरति हंसवत् ॥
तीव्रं सुखं कान्तलौहं निरुत्थं जायते ध्रुवम्" ।
"ततः कोटिसहस्रैर्वा कान्तलौहं महागुणम्" ॥
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

कान्ता, स्त्री, (काम्यते असौ । कम् + णिच् + कर्म्मणि क्त + टाप् ।) नारी । (यथा शृङ्गारतिलके ६ ।
"झटिति प्रविश गेहं मा बहिस्तिष्ठ कान्ते !
ग्रहणसमयवेला वर्त्तते शीतरश्मेः ।
अयि ! सुविमलकान्तिं वीक्ष्य नूनं स राहुर्ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय" ॥) प्रियङ्गुवृक्षः । इति मेदिनी ॥ सर्व्वाङ्गसुन्दरी स्त्री । इत्यमरः । २ । ६ । ३ ॥
(गङ्गा यथा, काशीखण्डे २९ । ४३ ।
"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥)
वृहदेला । रेणुका । नागरमुस्ता । इति राजनिर्घण्टः ॥

कान्ताङ्घ्रिदोहदः, पुं, (कान्तायाः अङ्घ्रिणा चरणस्पर्शेनैव दोहदः पुष्पोद्गमो यस्य । "पादाघाताद्शोको विकसति" इति कविप्रौढ़ोक्तेस्तथात्वम् ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ॥

कान्ताचरणदोहदः, पुं, (कान्ताचरणेन रमणीचरणस्पर्शेन दोहदः पुष्पोद्गमो यस्य । "पादाघाताद्शोको विकसति" । इति कविप्रौढ़ोक्तेस्तथात्वम् ।) अशोकवृक्षः । इति भूरिप्रयोगः ॥

कान्तायसं, क्ली, (अय एव आयसम् । कान्तं कमनीयं आयसम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥

कान्तारं, क्ली, (कस्य सुखस्य अन्तं ऋच्छति गच्छतीति । कान्त + ऋ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) उपसर्गादि । (कान्तं मनोज्ञं ऋच्छति प्राप्नोतीति । कर्म्मण्यण् ।) काननम् । (यथा, रेः रामायणे २ । २८ । ५ ।
"सीते विमुच्यतामेषा वनवासकृता मतिः ।
बहुदोषं हि कान्तारं वनमित्यभिधीयते" ॥)
पद्मविशेषः । इति हेमचन्द्रः ॥

कान्तारः, पुं, (कान्तं मनोज्ञं रसं ऋच्छति प्राप्नोति । कान्त + ऋ + अण् ।) इक्षुविशेषः । कतारे इति हिन्दी भाषा । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"कान्तार तापसाविक्षुवंशकावनुगुणौ मतौ" ।)
अस्य गुणाः । गुरुत्वम् । शुक्रश्लेष्मवृद्धिकारित्वम् । वृंहणत्वम् । सारकत्वञ्च । इति भावप्रकाशः ॥ कोविदारवृक्षः । वंशः । इति राजनिर्घण्टः ॥

कान्तारः, पुं, क्ली, (कस्य सुखस्य अन्तं ऋच्छति यत्र । हिंस्रसङ्कुलत्वात् । कान्त + ऋ + आधारे घञ् ।) महावनम् । (यथा, गोः रामायणे । ४ । ४३ । ११ ।
"कैकेयान् सिन्धुसौवीरान् कान्तारगिरयश्च ये ।
गिरिजालावृतां दुर्गां मार्गध्वं पश्चिमां दिशम्" ॥)
दुर्गमपथः । इत्यमरः ।२।१।१७ ॥ (उक्तञ्च—
"सिंहक्षुण्णकरीन्द्रकुम्भगलितं रक्ताक्तमुक्ताफलम् कान्तारे बदरीभ्रमाद्द्रुतमगाद्भिल्लस्य पत्नी मुदा" इति ।) विलम् । छिद्रम् । इति मेदिनी ॥